संस्कृत-वार्ता:

02.11.2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

· श्रीहरिकोटा-नगरतः सी. एम्. एस्.-03 इति उपग्रहस्य प्रक्षेपणम् अभवत्।

· स्वतन्त्रतायाः शताब्द-वर्षपर्यन्तं विकसितभारतस्य लक्ष्यं साधयितुं महिलानां पुरुषाणाञ्च सामूहिकप्रयासानां समानभागित्वस्य च आह्वानं राष्ट्रपतिः द्रौपदी मुर्मु वर्यया कृतम्।

· बिहार-विधानसभा-निर्वाचनस्य प्रथम-चरणस्य प्रचारः चरमोन्नतौ अस्ति, यत्र एन्. डी. ए. महाघटबन्धन चेत्येतयोः शीर्षनेतृभिः राज्ये बहुविध-सभाः सम्बोधिताः।

· क्रिकेट्-क्रीडायां, होबर्ट्-नगरस्य बेलरिव् ओवल्-इत्यत्र तृतीयायां टी-20-अन्ताराष्ट्रिय-क्रीडायां भारतं आस्ट्रेलिया-देशं पञ्चस्तोभैः पराजयत।

<u>राष्ट्रपतिः-उत्तराखण्डः</u>

राष्ट्रपतिः द्रौपदी मुर्मुः इत्येषा राष्ट्रस्य विकसितदेशः भवेत् इति धिया प्रतिबद्धतां दृढतया प्रकटितवती। सा उक्तवती यत् स्वतन्त्रतायाः शताब्द- वर्षपर्यन्तं एतल्लक्ष्यं साधयितुं महिलानां पुरुषाणाञ्च समान-सहभागित्वस्य आवश्यकता भविष्यतीति। अद्य हरिद्वार-नगरे पतञ्जलि-विश्वविद्यालयस्य द्वितीय-दीक्षान्त-समारोहं सम्बोधयन्ती राष्ट्रपतिः अवदत् यत् विकसित -भारतस्य सङ्कल्पं साधयितुं सामूहिकप्रयासः आवश्यकः अस्ति। महिलाशिक्षायाः महत्त्वं प्रकाशयन्ती श्रीमती मुर्मुः अवदत् यत् शिक्षिताः कन्याः राष्ट्रस्य गौरवम् वर्धयन्ति।

अद्य राष्ट्रपतिः उत्तराखण्ड-राज्यस्य त्रिदिवसीयायां यात्रायाम् अस्ति।

## बिहार-निर्वाचनाभियानम्

बिहारविधानसभानिर्वाचनस्य प्रथमचरणीय- प्रचारकार्यस्य केवलं दिनद्वयं एव अवशिष्टम् अस्ति, अतः एन्. डी. ए. अथ महाघटबन्धन् इत्येतयोः तारक-प्रचारकाः सम्पूर्णराज्ये जनसभाः सम्बोधयन्तः सन्ति। भोजपुर-जनपदस्य आरा-नगरे जनसभां सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् एन्. डी. ए-पक्षस्य निर्वाचन-घोषणा-पत्रम् बिहारस्य विकासाय निष्ठापूर्वकप्रयत्नस्य प्रतिनिधित्वं करोतीति। तद्विपरीतम्, सः महाघटबन्धन् इत्यस्य घोषणापत्रं असत्यैः पूरितमस्तीति वर्णितवान्। श्रीमोदी अवदत् यत् एन्. डी. ए. इत्यस्य संकल्पपत्रम् शिक्षायाः, स्वास्थ्यसेवायाः, वृत्यवसराणाञ्च विषयेषु केन्द्रितमस्ति । प्रधानमन्त्री अवदत् यत्, मुख्यमन्त्रि - महिला - रोजगार - योजनान्तर्गतं त्रिंशल्लक्षोत्तरैक - कोट्यधिकधिकाः लाभार्थिनः दश-सहस्ररूप्यकाणां आर्थिकसाहाय्यं प्राप्तवन्तः इति।

जनतादल-युनाइटेड इत्यस्य राष्ट्रियः अध्यक्षः मुख्यमन्त्री च नितीशकुमारः मुङ्गेरमण्डलस्य तारापुरक्षेत्रे निर्वाचनसमारोहं सम्बोधयन् अवदत् यत् राष्ट्रियजनतादलम् कदापि बिहारस्य विकासं सुनिश्चितं कर्तुं न शक्नोतीति यतो हि तेषां दलम् वंशवादस्य राजनीतौ विश्वसतीति। काङ्ग्रेस्-पक्षस्य सांसदः राहुलगान्धी इत्येषः अकथयत् यत् यदि बिहारराज्ये महाघटबन्धनं सत्तां प्राप्स्यति तर्हि उत्तमशिक्षां प्रदास्यतीति।

## इसरो-सी. एम. एस.-03

भारतस्य सर्वाधिकं भारयुतं सम्प्रेषण-उपग्रहं सी. एम्. एस्.-03 (जी. एस्. ए. टी.-7 आर्) इति अद्य सायङ्काले श्रीहरिकोटा-नगरस्य सतीश-धवन्-अन्तरिक्ष-केन्द्रात् प्रक्षेपितम् अभवत् । अस्य अभियानस्य उद्देश्यं नौसेनायाः सम्प्रेषण-वर्धनेन सह दूरस्थेषु प्रदेशेषु डिजिटलाख्यं सम्पर्कं वर्धनञ्च अस्ति। इसरो इत्यनेन अद्य सायं प्रायः सार्धपञ्चवादने देशस्य सर्वाधिकं भारयुतं सम्प्रेषण-उपग्रहं CMS-03 प्रक्षेपितम् ।

## पीएम-ई.एस.टी.आई.सी

नवदिल्ल्यां उदयोन्मुख - विज्ञान - प्रौद्योगिकी - नवान्वेषण - सम्मेलनस्य अस्य वर्षस्य उद्घाटनम् प्रधानमन्त्री नरेन्द्रमोदी करिष्यति । अस्मिन् अवसरे, प्रधानमन्त्री देशे आर एण्ड डी इकोसिस्टम् इत्यस्य वर्धनार्थं एक- लक्ष-कोटिरूप्यकाणां अनुसंधान-विकास-नवान्वेषण-योजना-कोषम् अपि उद्घाटयिष्यति। श्वस्तनादारभमाणम् त्रिदिवसीयं सम्मेलनम् अस्य मासस्य पञ्चमे दिनाङ्के समाप्स्यते।

## आकाशवाणी सङ्गीत् सम्मेलनम्

आकाशवाणी-सङ्गीत-सम्मेलनस्य सप्तषष्ठीतमं संस्करणम् अद्य देहलीनगरे, मुम्बै-नगरे, चेन्नै-नगरे च सङ्गीतसभया आरभ्यते। मासपर्यन्ताय आयोजितेऽस्मिन् कार्यक्रमे देशस्य चतुर्विंशति-नगरेषु शास्त्रीयसङ्गीतस्य प्रस्तुतय: भविष्यन्ति। संस्कृति-मन्त्रालयस्य सहयोगेन प्रसारभारती इत्यनेन अस्य आयोजनं क्रियते। सूचना-प्रसारण-मन्त्रालयः अवदत् यत् आकाशवाणी - सङ्गीत - सम्मेलनम् भारतस्य सम्मानितासु सांस्कृतिकपरम्परासु अन्यतमम् अस्ति इति।

## रशियादेशः/ अमरीका/ निन्दा

कैरिबियन्-देशेषु मादकद्रव्याणां प्रतिरोध-कार्यमधिकृत्य सैन्यबलस्य अत्यधिकप्रयोगः अभवदिति उक्त्वा रुस-देशः अमेरिकादेशस्य निन्दाम् अकरोत्। विदेशमन्त्रालयस्य प्रवक्ता मारिया जाखारोवा इत्येषा उक्तवती यत् एतादृशानि कार्याणि संयुक्तराष्ट्रसङ्घस्य अन्ताराष्ट्रिय-नियमानाञ्च उल्लङ्घनं कुर्वन्तीति। वेनेजुएला-देशस्य सार्वभौमत्वस्य समर्थनं रुस-देशः पुनः दृढीकुर्वन्, ल्याटिन्-अमेरिका-कैरिबियन-देशाश्च शान्तिमण्डले एव तिष्ठन्त्विति आग्रहमपि अकरोत्।

## मेक्सिको विस्फोटः

मेक्सिको-देशस्य सोनोरा-नगरस्य हर्मोसिल्लो-क्षेत्रे वाल्डो इत्यस्य सुपर-मार्केट इत्याख्यायां विपण्यां शनिवासरापराह्णे विस्फोटेन न्यूनातिन्यूनं त्रयोविंशतिजनाः मृताः, एकादश-जनाश्च व्रणिताः। अधिकारिणः मन्यन्ते यत् विस्फोटः आकस्मिकः आसीत्, अथ च किमपि हिंसात्मकम् आक्रमणम् नासीदिति।

## वियत्नाम्-प्रवाहः

मध्य-वियतनाम्-देशे विक्रमीवृष्ट्या आकस्मिकजलप्लावनेन च न्यूनातिन्यूनं पञ्चत्रिंशज्जनाः मृताः, पञ्च लुप्ताः, षष्टीजनाश्च व्रणिताः सन्ति। अद्य अधिकारिणः अवदन् यत् सार्धषोडशसहस्राधिकानि गृहाणि जलमग्नानि अभवन्नीति।

## एशियन्-यूथ्-गेम्स्

अस्मिन् वर्षे एशियन्-यूथ्-गेम्स् इत्यस्यां स्पर्धायां भारतम् अष्टचत्वारिंशत् पदकानि प्राप्तवत्। सामाजिक-माध्यमे श्रीमोदी अलिखत् यत् देशस्य युव-क्रीडकाः स्वस्य सर्वोत्तमप्रदर्शनेन क्रीडासु इतिहासं लिखितवन्तः इति। एतेषां क्रीडकानां उत्साहः, दृढनिश्चयः, परिश्रमश्च स्पष्टतया दृश्यते इति प्रधानमन्त्री अवदत्। एशियन्-यूथ्-गेम्स् 2025 इति क्रीडायाः समापनम् गत शुक्रवासरे बहरीन्-नगरे अभवत्।

## क्रिकेट-क्रीडायां

तृतीयायां टी-20 इति अन्ताराष्ट्रिय-क्रिकेट-क्रीडायां भारतीयपुरुषदलेन आस्ट्रेलिया-देशं पञ्चस्तोभैः पराजयत। अनेन विजयेन पञ्च -टी-20-आई- इति क्रीडा-शृङ्खलायां एकैकांकाभ्यां समं जातम्। क्रीडता अष्ट्रेलियेति दलेन षट्क्रीडकानां हानौ षडशीत्यधिकैकशत-धावनाङ्काः रचिताः आसन्।

महिला-क्रिकेट्

महिलानाम् एकदिवसीय - क्रिकेट् - विश्वचषक - स्पर्धा - मालिकायाः निर्णायके द्वन्द्वे भारतम् अद्य दक्षिणाफ्रीका-दलं सम्मुखीकरोति। एषा स्पर्धा नवमुम्बय्यां डी.वाई.पाटिल-क्रीडाङ्गणे क्रीड्यते। वार्तालेखनं यावत् एकस्याः क्रीडिकायाः हानौ भारतीय-महिलादलेन षडधिकैकशत-धावनाङ्काः विरचिताः सन्ति ।

इतः पूर्वं उपान्त्यचक्रीये द्वन्द्वे भारतेन आस्ट्रेलिया-दलं पञ्चक्रीडकानामवशेषे पराजितमासीत्।

।। इति वार्ताः ।।